अयं ग्रन्थः विरच्यते। अस्मिन् ग्रन्थे परिभाषायाः स्वरूपम्, परिभाषायाः सामान्यार्थः, परिभाषायाः सिद्धिप्रकारः, परिभाषायाः उदाहरणानि च प्रदर्श्यन्ते। एतावता कस्याश्चित् परिभाषायाः प्रयोजनं किमिति ज्ञातं भवति। शास्त्रान्तरे यद्यस्ति उपयोगः तर्हि तदर्थमपि सामान्यज्ञानमनेन सिध्यति। परिभाषेन्दुशेखरग्रन्थे १३३ परिभाषाः व्याख्याताः, ततोन्यत्र सीरदेवादिभिः अपि बह्व्यः परिभाषाः व्याख्याताः। परन्तु अस्मिन् ग्रन्थे सौलभ्याय ततः चिताः ६५ परिभाषाः एव व्याख्याताः।

अस्माकं केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयकुलपतिभिः प्रो. श्रीनिवासवरखेडिवर्यैः शास्त्राध्ययनसौकर्याय, बाह्यविषयज्ञानामपि संस्कृतं प्रत्याकर्षणाय च सरलसंस्कृतभाषया ग्रन्थानां निर्माणं कार्यमिति सङ्कल्पितम्। तदनुगुणं प्रकाशन-अनुभागेन **सङ्क्षेपग्रन्थहारः** इति प्रकल्पः उपस्थापितः। तत्र मादृशानां बालानां कृते अपि ग्रन्थलेखनार्थमवसरः तैः प्रकल्पितः इति सप्रणाममभिवन्दामि तान्। इष्टदेवस्य गुरूणां चाशीर्वादेन पित्रोश्चाशिषा यथाज्ञानं ग्रन्थोऽयं संग्रथ्यते। उक्तानुक्तदुरुक्तेषु सहनं तत्रभवन्तः विधास्स्यन्तीति मे मतिः।

भवद्विधेयः

**श्री. सुब्रह्मण्यभट्टः**

## अनुक्रमणिका


1. व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्। १
2. यथोद्देशं संज्ञापरिभाषम्। २

3. कार्यकालं संज्ञापरिभाषम्। २
4. एकान्ताः। ३
5. नानुबन्धकृतमनेकाल्त्वम्। ४
6. नानुबन्धकृतमनेजन्तत्। ५
7. नानुबन्धकृतमसारूप्यम्। ७
8. उभयगतिरिह भवति। ८
9. कार्यमनुभवन्हि कार्यी निमित्ततया नाश्रीयते। १०
10. यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते। ११
11. निर्दिश्यमानस्यादेशा भवन्ति। १२
12. यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः। १३
13. अर्थवद्ग्रहणे नानर्थकस्य। १५
14. गौणमुख्ययोर्मुख्य कार्यसम्प्रत्ययः। १६
15. एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः। १७
16. क्वचिदेकदेशोऽप्यनुवर्तते। १८
17. भाव्यमानेन सवर्णानां ग्रहणं न। १९
18. भाव्यमानोऽप्युकारः सवर्णान्गृह्णाति। २०
19. वर्णाश्रये नास्ति प्रत्ययलक्षणम्। २१
20. प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्। २२
21. प्रत्ययग्रहणे चापञ्चम्याः। २४
22. उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्। २५
23. स्त्रीप्रत्यये चानुपसर्जने न। २६
24. संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति। २७
25. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्। २८

26. पदाङ्गाधिकारे तस्य च तदन्तस्य च। ३०
27. व्यपदेशिवदेकस्मिन्। ३१
28. ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति। ३२
29. यस्मिन्विधिस्तदादावल्ग्रहणे। ३४
30. एकदेशविकृतमनन्यवत्। ३५
31. पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः। ३६
32. पुनः प्रसङ्गविज्ञानात् सिद्धम्। ३६
33. सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव। ३६
34. विकरणेभ्यो नियमो बलीयान्। ३८
35. परान्नित्यं बलवत्। ४०
36. असिद्धं बहिरङ्गमन्तरङ्गे। ४१
37. अन्तरङ्गादप्यपवादो बलीयान्। ४४
38. येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति। ४४
39. पुरस्तादपवादाः अनन्तरान् विधीन् बाधन्ते नोत्तरान्। ४६
40. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः। ४७
41. अपवादो यद्यन्यत्र चरितार्थः तर्ह्यन्तरङ्गेण बाध्यते। ४८
42. अभ्यासविकारेषु बाध्यबाधकभावो नास्ति। ४९
43. उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्। ५१
44. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्। ५२
45. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थावगतिः। ५३
46. गतिकारकोपपदानां कृद्भिः......... ५५
47. चानुकृष्टं नोत्तरत्र। ५६
48. निरनुबन्धकग्रहणे न सानुबन्धकस्य। ५८

49. तदनुबन्धकग्रहणे न अतदनुबन्धकस्य। ५८
50. सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य। ६०
51. सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यपायः। ६१
52. ताच्छीलिके णेऽण्कृतानि भवन्ति। ६३
53. तन्मध्यपतितस्तद्ग्रहणेन गृह्यते। ६४
54. प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम्। ६५
55. उपपदविभक्तेः कारकविभक्तिर्बलीयसी। ६७
56. प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः। ६८
57. अवयवप्रसिद्धेः समुदायप्रसिद्धिः बलीयसी। ६९
58. सामान्यातिदेशे विशेषानतिदेशः। ७०
59. सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्। ७१
60. श्रुतानुमितयोः श्रुतसम्बन्धो बलवान्। ७२
61. अभेदकाः गुणाः। ७३
62. बाधकान्येव निपातनानि। ७४
63. पर्जन्यवल्लक्षणप्रवृत्तिः। ७५
64. सम्प्रसारणं तदाश्रयं च कार्यं बलवत्। ७६
65. अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः। ७६